help him to get over the time-honoured shyness he feels towards everything in the Devanagri script. To ensure correctness of idiom and simplicity of diction the book has been subjected to an intensive revision by senior Pandits of the Oriental College and other local Sanskrit Scholars.

Let me hope that every patriotic educationist interested in the popularisation of Sanskrit studies will appreciate Panditji's work and encourage him in his maiden attempt.

Oriental College,
Lahore.
13 6-33.

BANARSI DAS

॥ ओ३म् ॥

निवेदन

श्री विद्वद्वर डाक्टर बनारसीदास जैन एम० ए०,
पी० एच० डी०, ओरियन्टल कालिज, लाहौर

की सम्मति के अनुसार यह पुस्तक संस्कृत के विद्यार्थियों के लिए लिखी गई है जो कि अत्यन्त सरल तथा उपयोगी है। इस में मनोरञ्जक कथाओं का संग्रह किया गया है नीचे कठिन शब्दों के अर्थ हैं ताकि विद्यार्थी बिना किसी की सहायता के स्वयं ही पढ़ सकें। आशा है अध्यापक तथा छात्र इस पुस्तक को अपना कर मेरा उत्साह बढ़ायेंगे।

मैं अपने शिष्य श्रीयुत मुलराज जैन का धन्यवाद करता हूं जिन्हों ने मुझे प्रूफ-संशोधन में सहायता दी है।

लब्धराम।

मुद्रक

विनोद मञ्जरी

१ मूषकाणां सभा ।

एकदा सर्वे मूषकाः मिलित्वा परस्परम् अचिन्तयन् । अस्ति कश्चित् उपायः येन अस्माकं मार्जारात् भयं नश्येत् । तेषां मध्यात् एकः नववयस्कः[1] मूषकः अब्रवीत् । "भोः अस्ति एकः सरलः उपायः यदि एका क्षुद्रघण्टिका मार्जारस्य कण्ठे बद्धा भवेत्, तर्हि तस्याः क्षुद्रघण्टिकायाः टन टन रवेण तस्य आगमनस्य बोधः भविष्यति" । तत् श्रुत्वा सर्वे मूषकाः उदहर्षन्त[2] अभाषन्त च । "साधु साधु उक्तम्. एष एव अस्माकं रक्षणस्य उपायः" । परम् एकः प्रत्युत्पन्नमतिः[3] वृद्धः मूषकः अवदत्. "भोः अस्ति कश्चित् वीरः अस्मासु यः मार्जारस्य कण्ठे घण्टिकां बध्नीयात्" तत् श्रुत्वा सर्वे चिन्तासागरे निपतिताः । एतस्मिन् एव अवसरे एकः बिडालः धावन् तत्र आगच्छत् । सर्वे मूषकाः इतस्ततः धावितुम् आरब्धाः ।

[illegible]

[illegible]

मन्यम् उक्तम्,
उपायं चिन्तयेत् प्राज्ञः तथाअपायश्च[1]

२. टैलीफोनयन्त्रे पितुः

एकस्य श्रेष्ठिनः गृहे टैलीफोनयन्त्रम्
यदा स श्रेष्ठी महाशयः कस्यचित् कार्यस्य कृते
गच्छति स्म, तदा स्वधर्मपत्न्या सह टैलीफोन
वार्त्तालापं करोति स्म । तस्य श्रेष्ठिनः एका
बालिका आसीत् । एकदा स श्रेष्ठी महाशयः
सह यदा वार्त्तालापं कर्तुम् प्रारभत, तदा तस्य श्रेष्ठिनः
सा बालिका स्वमातुः समीपम् आगच्छत् । माता
अपि तस्याः पितुः सन्देशं श्रावयितुं स्वबालिकायाः कर्णे
टैलीफोनम् 'स्थापितवती । सा बालिका अपि स्व जनकस्य
स्वरं ज्ञात्वा विलापम् अकरोत् । हा मातः २ आः तातः
टैलीफोनमध्ये प्रविष्टः बहिः कथम् आगमिष्यति ॥

[1] त्यजेत् ॥
[2] गृहाय के लिए ।
[3] लगवा दिया ।

३. अहिफेनसेवी।

एकः अहिफेनसेवी¹ ग्रीष्मे ऋतौ ज्येष्ठे मासे मध्याह्ने² स्वतनः स्ववस्त्राणि उत्तार्य³ वृक्षस्य छायायां सुप्तः। अथ कश्चित् धूर्तः तानि वस्त्राणि स्वशरीरे परिधाय⁴ तस्यैव समीपे सुप्तः। यदा अहिफेनसेवी प्रबुद्धः तदा स्ववस्त्राणि परिदधानं⁵ समीपे अन्यं पुरुषं दृष्ट्वा विस्मितः मनसि अचिन्तयत्, अहो! अयम् अहम् अस्मि किम्वा अहम् अयम् अस्मि॥

४. स्वप्नायमानः वस्त्रविक्रेता।

एकः वस्त्रविक्रेता¹ श्रेष्ठी निशायां स्वगृहे स्वापिति स्म, स्वप्ने केनापि ग्राहकेण सह कस्यचित् वस्त्रस्य विक्रयणाय वार्त्तालापम् अकरोत्। वस्त्रस्य मूल्ये निर्णीते तेन श्रेष्ठिना स्वस्य एव स्वम् उत्तरीयं² हस्ताभ्यां विदार्य

मन्यम् उक्तम्,

उपायं चिन्तयेत् प्राज्ञः तथाऽपायञ्च[1] चिन्तयेत् ॥

२. टेलीफोनयन्त्रे पितुः प्रवेशः ।

एकस्य श्रेष्ठिनः गृहे टेलीफोनयन्त्रम् आसीत् । यदा स श्रेष्ठी महाशयः कस्यचित् कार्यस्य कृते बहिः गच्छति स्म, तदा स्वधर्मपत्न्या सह टेलीफोन द्वारा वार्तालापं करोति स्म । तस्य श्रेष्ठिनः एका त्रिवर्षा बालिका आसीत् । एकदा स श्रेष्ठी महाशयः धर्मपत्न्या सह यदा वार्तालापं कर्तुम् प्रारभत, तदा तस्य श्रेष्ठिनः सा बालिका स्वमातुः समीपम् आगच्छत् । माता अपि तस्याः पितुः सन्देशं श्रावयितुं[2] स्वबालिकायाः कर्णे टेलीफोनम् [3]स्थापितवती । सा बालिका अपि स्व जनकस्य स्वरं ज्ञात्वा विलापम् अकरोत् । हा मातः २ आः तातः टेलीफोनमध्ये प्रविष्टः बहिः कथम् आगमिष्यति ॥

१ हानि ॥

२ सुनाने के लिये ।

३ रखदी भई ।

३. अहिफेनसेवी ।

एकः अहिफेनसेवी ग्रीष्मे ऋतौ ज्येष्ठे मासे मध्याह्ने स्ववस्त्राणि उत्तार्य वृक्षस्य छायायां सुप्तः । अथ कश्चित् धूर्तः तानि वस्त्राणि स्वशरीरे परिधाय तस्यैव समीपे सुप्तः । यदा अहिफेनसेवी प्रबुद्धः तदा स्ववस्त्राणि परिधानं समीपे अन्यं पुरुषं दृष्ट्वा विस्मितः मनसि अचिन्तयत्, अहो ! अयम् अहम् अस्मि किंवा अहम् अयम् अस्मि ॥

४. स्वप्नायमानः वस्त्रविक्रेता ।

एकः वस्त्रविक्रेता रात्रौ निशायां स्व गृहे स्वपिति स्म, स्वप्ने केनापि ग्राहकेण सह कस्यचित् वस्त्रस्य विक्रय-वार्तालापम् अकरोत् । वस्त्रस्य मूल्ये निर्णीते तेन प्रेप्सिता स्वयम् एव स्वकम् उत्तरीयं हस्ताभ्यां विदार्य

७ अहम् तु एकेनैव नेत्रेण पश्यामि

एकः युवा अक्ष्णा काणः नाट्यशालायां[1] महाभारत नाटकं द्रष्टुं गतः । तत्र प्रवेश पत्रं[2] ग्रहीतुं तेन नियत मूल्यस्य अर्धम् मूल्यं दत्तम् । तदा प्रबन्धकर्ता पृष्टम् "भोः बालकः असि त्वम् यत् प्रवेशपत्रस्य अर्धमूल्यं ददासि" काणः अवदत् "हे महाशय, अहं तु युवा न बालः अस्मि किन्तु अहम् एकेन एव चक्षुषा पश्यामि, अतः प्रवेश—पत्रस्य मूल्यम् अपि अर्धं ददामि" ॥

८ गणित-पत्रम्

एकः विद्यार्थी वार्षिकीं[3] परीक्षां दातुं पाठशालां गच्छति स्म । यदा स गणितस्य उत्तर-पत्रं दत्त्वा गृहम् आगच्छत् । तदा तस्य पिता तम् अपृच्छत् "वत्स ! अद्य कस्मिन् विषये परीक्षा आसीत् ?" विद्यार्थी अकथयत्, "तात, गणिते" ।

तातः "मन्ये[4] सर्वेषां प्रश्नानाम् उत्तराणि शुद्धानि लिखितानि ।"

विद्यार्थी, "एकस्य एव उत्तरम् अशुद्धम्" ।

पिता "कति प्रश्नाः आसन्" ।

वत्सः "तात, दश

१ थियेटर । २ टिकट ।
३ वर्ष बाद होने वाला । ४ मैं ध्यान करता हूँ ।

स्थाल्यौ[1] घृतेन[2] व्यञ्जनं[3] संस्कृत्य प्रेषय। याचकः एकाम् एव भोजन स्थालीं सज्जीकृत्य अग्रे स्थापितवान्। अन्य पुरुषस्य प्रतीक्षां कुर्वन् अतिष्ठत्। अतः स्थूलेन पुरुषेण उक्तम्; "भो पाचक एक एव स्थाली प्रेषिता मया तु द्वे कथिते"।

पाचकः—"श्रीमन्, अहं प्रतीक्षां करोमि न च अन्यः कश्चित् दृश्यते यस्य कृते द्वितीया स्थाली सज्जी क्रियते"।

भो पाचक, न पश्यसि मम शरीरस्य स्थूलत्वम् अहम् एक एव द्वयोः पुरुषयोः समः॥

११. अश्वस्योपरि प्रस्तावः

एकः अध्यापकः सर्वान् छात्रान् आज्ञापयत्, "श्वः[5] दिने सर्वैः अश्वस्य उपरिलेखः लेखनीयः।" तेषाम् एकः बालकः गृहम् आगच्छत्। तस्य मनसि अश्वस्योपरि प्रस्तावस्य लेखनाय विचारः उत्पन्नः। स बालकः शीघ्रं लेखनीं पत्रादिकं च गृहीत्वा अश्वशालायां[6] गत्वा अश्वस्य उपरि आरुह्य[7] प्रस्तावं लिखितुं प्रारभत। अल्पसमयानन्तरं तस्य पिता कार्य्यवशात् तत्र आगच्छत्, ...

१ दो थाली। २ घी से।
३ सब्ज़ी बनाकर। ४ तैयार कर।
५ आने वाले कल का दिन। ६ अस्तबल।
७ चढ़ कर।

स यत्, तस्य पुत्रः अश्वस्य उपरि आरूढः किञ्चित् लिखति । स पुत्रम् अपृच्छत्, "अत्र अश्वशालायां त्वम् किं करोषि ?"

पुत्रः— तात प्रस्तावं लिखामि ।

पिता :— गृहं स्थित्वा किं न लिखसि ?

पुत्र :- अध्यापकेन आज्ञप्तः अस्मि यत् प्रस्तावः अश्वस्य उपरि लेखनीयः अतः अश्वस्य उपरि उपविश्य प्रस्तावं लिखामि ॥

१२. खाजा इति ।

एकः ग्रामीणः कस्यचित् मिष्टान्नविक्रेतुः हट्टं अगच्छत् । भोः भोः महाशय एषु स्थालेषु स्थापितानां मिष्टान्नानाम् कानि २ नामानि इति अपृच्छत् ।

मिष्टान्नविक्रेता :—"इमे मोदकाः, अयं संयावः, इमे अपूपाः, इमाः शष्कुल्यः, इदं खाजा इति । ग्रामीणः खाजा इति शब्दं श्रुत्वा एव हस्तेन तत् मिष्टान्नं भक्षयितुं प्रारभत । तदा मिष्टान्नविक्रेता आह, "भो इदं किं [illegible]

इति, अतएव अहम् भक्षयितुम् आरब्धवान्, न अत्र मम दोषः, मया तु भवतः आज्ञा पालिता ।

१३. वानराणामनुकरण शीलता ।

कश्चित् वणिक् प्रचुराः[१] टोपिकाः[२] गृहीत्वा अन्यदेशे विक्रेतुं गच्छति स्म, यदा स श्रान्तः, एकस्य वृक्षस्य छायायां सुप्तः ।

तत्र सुप्तं तं निरीक्ष्य सर्वे वानराः तस्य पार्श्वे गत्वा स्थापिताः सर्वाः टोपिकाः स्व २ शिरसि निधाय[३] वृक्षोपरि आरूढाः । यदा स प्रबुद्धः स एकामपि टोपिकां न अपश्यत् । इतस्ततः दृष्टिं निक्षिप्य यदा उपरि पश्यति तदा सर्वे वानराः धृतटोपिकाः' इतस्ततः पलायन्ते स्म । ततः स खिन्न चित्तः नाना विधान् उपायान् अकरोत् । परम् एकः अपि सफलः न अभवत् । अन्ते क्रुद्धः स्व शिरसि निहिता टोपिकामपि भूमौ प्रक्षिपन् अकथयत्— रे दुष्टाः वानराः, इमामपि गृह्णताम्, तदा सर्वे वानराः स्व २ शिरस टोपिका अक्षिपन् । स च प्रसन्नचित्तः ताः गृहीत्वा स्वमार्गं प्रस्थितः ।

१ बहुन । २ टोपिया । ३ रखकर ।

स्यामेकः कूपः खानितः । तस्मात् कूपात् ग्रामवासिनः सर्वे एव जनाः जलं कर्षन्ति । एकदा धनदत्तस्य सागरदत्तेन सह कलहो जातः । अनेन सागरदत्तः स्वकूपात् जलकर्षणे वारितः । अनेन सागरदत्तस्य कुटुम्बे जलाभावाद् महद् दुःखं जातम् । तेन चिन्तितम् यद्यहं केनापि प्रकारेण धनदत्तादिमम् कूपमेव क्रीणामि ततः सुखी भवामि । इति चिन्तयित्वा तेन धनदत्तात् कूपः क्रीतः धनदत्तश्च जलकर्षणात् रुद्धः ।

इदानीम् धनदत्तस्य कुटुम्बे जलस्य न्यूनतायाः महान् क्लेशः संजातः स पश्चात्तापम् करोति यन्मया वृथैव कूपो विक्रीतः । मम गृहं धनस्य त्रुटिर्नास्ति । अत्रान्तरे तस्य कोपि सुहृद् वारिष्टरः[1] तम् द्रष्टुमागतः । श्रेष्ठिनो गृहे जलस्याभावग्रायम् दृष्ट्वा तत्कारणम् पृष्टवान् । सर्वम् वृत्तान्तम् ज्ञात्वा तेन धनदत्तः कथितः—मा चिन्तां कुरु । अहम् जलस्योपरि तव स्वामित्वम् सिद्धं करिष्यामि । त्वम् शीघ्रमेव न्यायालये अर्थिरूपेण पत्रम् देहि इति ।

धनदत्तेन न्यायालये व्यवहारः स्थापितः । न्यायाधीशेन तन्निर्णयार्थं काचित्तिथि नियता । नियतायाम्

१—अधिवक्तृविशेषः । प्राड्विवाकस्य न्यायालये यो जनः करोति स वारिष्टर इति कथ्यते लोकभाषायाम् वरिस्टर इति प्रसिद्धः

स्वीकृतः । अथ धनदत्तः सगरदत्तश्च परस्परम्
कुरुताम् । यद् आवाम् पूर्ववत् मित्रे भवावः
अलंकर्षावः । एते वारिष्ठिगदयः वाक्चतुराः
सर्वं धनं हरिष्यन्ति ।

(मूलराज जैन द्वारा लिखित डी० ए० वी० स्कूल
मैगज़ीन (मई १९३३) में उद्धृत)

१९ परमात्मा कुत्र वसति किं च क

एकदा सम्राट् अकबरः वीरवरम् अपृच्छत्
वीरवर, परमात्मा किं करोति कुत्र च वसति,
श्रुत्वा वीरवरः उत्तरं दातुं न अशक्नोत्, अकब
"कठिनो ऽयं प्रश्नः, अष्टदिनानन्तरम् अस्य उ
समर्थ भविष्यामि" । सम्राट् अवदत् , एवम्
चिन्तातुरः वीरवरः स्ववेश्म गत्वा सुप्तः । स
तस्य बालः स्वपितुः चिन्तायाः कारणम् अपृच्छत्
वीरवरोऽपि स्वस्य भावं पुत्राय अकथयत् । पुत्र
न अत्र कापि चिन्ता कार्या, अहम् एव तत्र गत्
प्रश्नस्य उत्तरं दास्यामि । तदा वीरवर नियतदिने
गत्वा अवदत् । महाराज, अयं मदीयः लघुः पुत्र
प्रश्नस्य उत्तरं दास्यति । तदा सम्राट् तं बालम् अ
बाल प्रत्यवदत् , "राजाधिराज, शिष्यभावेन

[illegible]

भगवन् गुरो मा एव अकालवर्षा, या अस्माकं क्रीडनमर्षं वर्षति क्रीडायां वा विघ्नम् करोति ॥

२२ पितृवाचकः बाबू शब्दः

एकस्य महाशयस्य पञ्चवर्षः बालः स्वपितरं बाबूशब्देन आकारयति स्म[१]। एकदा तस्य गृहे एकः महान् धनी आगच्छत ॥ तदा तस्य बालकस्य पिता समागतं धनिनं बाबूशब्देन अभाषत ॥ बालः मनसि व्यचारयत्, "अयं मम पितुः पिता भविष्यति, अतः एव मदीयः पिता तं बाबूशब्देन आह्वयति[२]" ॥ कतिपयदिवसान्[३] पश्चात् स धनी पुनरागत, तं धनिनं दृष्ट्वा स बालः पितरम् अकथयत् बाबू २ भवतः पिता समागतः। तदा स धनी तं बालम् प्रेम्णा अकथयत् तात, बाबूशब्देन न पिता ज्ञायते। एकः महाशयः श्रेष्ठः सज्जनः बाबू इति कथ्यते। तदा स बालः तम् अपृच्छत्, तर्हि मम पिता महाशयः एव न जनकः, स धनी उच्चैः अहसत् ॥

२३ एका क्रिया द्व्यर्थकरी प्रसिद्धा

कश्चित् श्रेष्ठी महाशयः स्वभृत्यम् ...
अतिमूढः दीर्घसूत्री च आसि, यत् ...

१ बुलाता था। २ बुलाता है। ३
४ एक दो दिन बाद। ५ देरी से काम

उच्चैः स्वरेण लालः लालः इति आह्वयत्। अल्प समयाद्-नन्तरम्[1] एकः भृत्यः बहिरागत्य अपृच्छत्। "भवान् कं मिलितुम् इच्छति"? पण्डितः— "लालः गृहे अस्ति किं"? भृत्यः उत्तरम् अनुक्त्वा[2] एव गृहस्य अभ्यन्तरं गत्वा लालम् अब्रवीत्, "पण्डितः बहिस्तिष्ठति" इति। लालः सुखेन शय्यायां विश्राम्यति स्म[3], भृत्यम् अकथयत् "बहिर् गत्वा लालः गृहे नास्ति" इति कथय। भृत्योऽपि बहिरागत्य पण्डितम् अब्रवीत्, लालः गृहे नास्ति।" इति श्रुत्वा पण्डितः अवदत् "महदाश्चर्य्यम् एतत्, किं स मूर्खः यः अस्मिन् चण्डातपसमये बहिर्गतो भवेत्"? । एतत् श्रुत्वा भवनान्तरात्[4] लालः अब्रवीत्, "नाहं मूर्खः परञ्च त्वमेव मूर्खः यः अस्मिन् चण्डातपसमये समागतः"॥

२५ ब्राह्मणाय गलपाशः[5] अवश्य-मेव देयः।

एकदा सम्राजा अकब्बरेण मृत्युदण्डाय एकः आज्ञप्तः। तस्मिन् समये वीरबरः अपि समागतः। रेण मनसि विचारितम्, अयम् ब्राह्मणः ...

१ थोड़े समय के बाद २ बिना कुछ कहे ... रहा था ४ घर के अन्दर से ५ फांसी ६ देने लायक।

व्यंजनं[1] कृत्वा भक्षयिष्यामि" लोकाः हसन्तः इतस्ततः अगच्छन्।

२७ गणनायां कष्टं भविष्यति

कश्चित् मनुष्यः मण्डीनाम[2] विपण्यां गोधूमं[3] क्रेतुम् अगच्छत्। वणिजं प्रति तस्य गोधूमस्य मूल्यम् अपृच्छत्

वणिक् अवदत्—एकस्य रूप्यकस्य अष्टादश सेरकाः दीयन्ते॥

ग्राहकः—तोलयतु भवान्।

वणिक् गोधूमं तोलयित्वा अददात्। यदा ग्राहकः भारम् अतोलयत् तदा परिमाणे अतीव न्यूनता आसीत्। ततः क्रुद्धो भूत्वा वणिजम् अपृच्छत्, "अष्टादश सेरकान्-मिषाय कथं द्वादश सेरकान् प्रयच्छसि"। वणिक् अब्रवीत् "मया विचारितम् अष्टादश सेरकानाम् भारः त्वदर्थं कष्टप्रदो भविष्यति अतः मया द्वादश प्रस्थाः[4] दत्ताः"।

ग्राहकः—गृह्यताम् अस्य गोधूमस्य मूल्यम्। द्वादश आणकाम् एव प्रदाय "गन्तुम् इच्छति। वणिक्—"भोरूप्यकस्थाने कथं द्वादशाणकान् प्रयच्छसि" ग्राहकः—"मया चिन्तितम्, गणानायां ते कष्टं भविष्यति"।

[1] भरता बना कर। [2] मण्डी में। [3] गेहूं। [4] सेर। [5] देकर

२८ हे ईश्वर त्वम् अपि चतुरोऽसि

एकः कृपणः[1] मार्गे गच्छन् परमात्मानं प्रार्थयत्, "हे भगवन् दीनबन्धो, यदि भवतः कृपया अद्य मया रूप्यकं एकं लभ्ये तदा अहं प्रसाद[2]रूपेण आणक-चतुष्टयं दास्यामि। भाग्यवशात् रूप्यकमेकं मार्गे लब्धम्, उत्थाप्य[3] रूप्यकं ईश्वराय कोटिशः धन्यवादान् ददत। एकस्य श्रेष्ठिनः पण्यशालायाः तस्य रूप्यकस्य द्रम्मान्[4] अयाचत। श्रेष्ठी अपि रूप्यकं पाषाणपट्टिकायां निक्षिप्य तस्य शब्दं श्रुत्वा अभाषत "कूटमिदं" रूप्यकं यदि इच्छसि द्वादशाणकान् दातुं शक्नोमि"। द्वादशाणकान् गृहीत्वा परमात्मानं अकथयत्—हे ईश्वर त्वम् अतीव चतुरोऽसि। त्वया ज्ञातम् अयम् कृपणः चतुर्थांशं दद्यात् न वा अतएव चतुर्थः भागः, अर्थात् आणकचतुष्टयं त्वया पूर्वमेव गृहीतम्।

२९ न तव न मम

कश्चित् ग्रामीणः एकस्य मिष्टान्नविक्रेतुः विपण्याम् अगच्छत्। एकस्याः स्थाल्याः सकाशात् किञ्चित् मिष्टान्नम् उत्थाप्य हस्ते गतवान्। मिष्टान्नविक्रेता

१ कंजूस। २ परमात्मा। ३ [illegible]। ४ [illegible]
[illegible]

भोः दुष्ट, कं पृष्ट्वा त्वया गृहीतं मिष्टान्नम्। तिष्ठ त्वां दण्डयामि। स्थापय मे मिष्टान्नम्।

ग्रामीणः—मिष्टान्नं स्थाल्यां न धृतवान् न च किंचिदपि उक्तवान्। यदा मिष्टान्नविक्रेता दण्डमुद्यम्य ताडयितुम् ऐच्छत् तदा ग्रामीणेन त्वरितं शुनः अग्रे प्रक्षिप्तम् कथितम् च अधुना न त्वदीयं न मदीयम्।

३० मम क्रोधः शान्तो भविष्यति

एकः बाबू महाशयः मार्गे गच्छन् एकं साधुं दूषितानि वचनानि अभाषत। साधुः तं उपानहा अताडयत्। बाबू महाशयः न्यायालये तस्य साधोः विरुद्धं निवेदनपत्रम् अयच्छत्। नियतदिने न्यायाधीशः तं साधुं आहूय अपृच्छत्। भोः साधो किमर्थं त्वया ताडितः उपानहा एषः महाशयः, साधुः—"न्यायाधीश अनेन दूषितं भाषितम्। न्यायाधीशः—तथापि त्वया अनुचितम् कृतम्, अतः त्वाम् अष्टाणकैः दण्डयामि। साधुः शीघ्रमेव रूप्यकमेकं निष्कास्य न्यायाधीशाय अददात् अकथयत् च। अष्टाणकं शेषं न गृह्णामि प्रत्युत तस्य कृते पुनरपि एकवारं उपानहा ताडयितुमिच्छामि तत्पश्चात् मे क्रोधः शान्तो भविष्यति।

१ रखो। २ [illegible]। ३ कुत्ते के। ४ बुरे शब्द = गाली। [illegible] ५ जूते से मारा। ६ अर्जी दिया।

भोः दुष्ट, कं पृष्ट्वा त्वया गृहीतं मिष्टान्नम्। तिष्ट त्वां दण्डयामि। स्थापय[1] मे मिष्टान्नम्।

ग्रामीणः—मिष्टान्नं स्थाल्यां न धृतवान न च किंचिदपि उक्तवान्—यदा मिष्टान्नविक्रेता दण्डमुद्यम्य ताडयितुम् ऐच्छत् तदा ग्रामीणेन त्वरितं शुनः[3] अग्रे प्रक्षिप्तम् कथितम्च अधुना न त्वदीयं न मदीयम्।

३० मम क्रोधः शान्तो भविष्यति

एकः बाबू महाशयः मार्गे गच्छन् एकं साधुं दूषितानि वचनानि[4] अभाषत। साधुः तं उपानहा[5] अताडयत्। बाबू महाशयः न्यायालये तस्य साधोः विरुद्धं निवेदनपत्रम् अयच्छत्। नियतदिने न्यायाधीशः तं साधुं आहूय अपृच्छत्। भोः साधो किमर्थं त्वया ताडितः उपानहा एषः महाशयः," साधुः—"न्यायाधीश अनेन दुरितं भाषितम्। न्यायाधीशः—तथापि त्वया अनुचितम् कृतम्, अतः त्वाम् अष्टाणकैः दण्डयामि[6]। साधुः—शीघ्रमेव रूप्यकमेकं निष्कास्य न्यायाधीशाय अददात् अकथयत् च। अष्टाणकं शेषं न गृह्णामि प्रत्युत् तस्य कृते पुनरपि एकवारं उपानहा ताडयितुमिच्छामि तत्पश्चात् मे क्रोधः शान्तो भविष्यति।

१ रख दे। २ धरा। ३ कुत्ते के। ४ बुरे शब्द = गाली गलौच। ५ जूते से मारना। ६ जुर्माना करना।

विषय-सूची